# Sanatkumaraproktam Vishnumahatmyam

# સનત્કુમારપ્રોક્તં વિષ્ણુમાહાત્મ્યમ્

## Document Information

Text title : Sanatkumaraproktam Vishnumahatmyam

File name : sanatkumAraproktaMviShNumAhAtmyam.itx

Category : vishhnu, vishnu, mahAbhArata, mAhAtmya

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya (286)271/19-29||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# સનત્કુમારપ્રોક્તં વિષ્ણુમાહાત્મ્યમ્

અનાદિનિધનઃ શ્રીમાન્હરિર્નારાયણઃ પ્રભુઃ ।
સ વૈ સૃજતિ ભૂતાનિ સ્થાવરાણિ ચરાણિ ચ ॥ ૧૯॥

એષ સર્વેષુ ભૂતેષુ ક્ષરશ્ચાક્ષર એવ ચ ।
એકાદશવિકારાત્મા જગત્પિબતિ રશ્મિભિઃ ॥ ૨૦॥

પાદૌ તસ્ય મહીં વિદ્ધિ મૂર્ધાનં દિવમેવ ચ ।
બાહવસ્તુ દિશો દૈત્ય શ્રોત્રમાકાશમેવ ચ ॥ ૨૧॥

તસ્ય તેજોમયઃ સૂર્યો મનશ્ચન્દ્રમસિ સ્થિતમ્ ।
બુદ્ધિર્જ્ઞાનગતા નિત્યં રસસ્ત્વપ્સુ પ્રવર્તતે ॥ ૨૨॥

ભ્રુવોરનન્તરાસ્તસ્ય ગ્રહા દાનવસત્તમ ।
નક્ષત્રચક્રં નેત્રાભ્યાં પાદયોર્ભૂશ્ચ દાનવ ॥ ૨૩॥

રજસ્તમશ્ચ સત્ત્વં ચ વિદ્ધિ નારાયણાત્મકમ્ ।
સ આશ્રમાણાં મુખં તાત કર્મણસ્તત્ફલં વિદુઃ ॥ ૨૪॥

અકર્મણઃ ફલં ચૈવ સ એવ પરમવ્યયઃ ।
છન્દાંસિ તસ્ય રોમાણિ અક્ષરં ચ સરસ્વતી ॥ ૨૫॥

બહ્વાશ્રયો બહુમુખો ધર્મો હૃદિ સમાશ્રિતઃ ।
સ બ્રહ્મપરમો ધર્મસ્તપશ્ચ સદસચ્ચ સઃ ॥ ૨૬॥

શ્રુતિશાસ્ત્રગ્રહોપેતઃ ષોડશર્ત્વિક્ક્રતુશ્ચ સઃ ।
પિતામહશ્ચ વિષ્ણુશ્ચ સોઽશ્વિનૌ સ પુરન્દરઃ ॥ ૨૭॥

મિત્રશ્ચ વરુણશ્ચૈવ યમોઽથ ધનદસ્તથા ।
તે પૃથગ્દર્શનાસ્તસ્ય સંવિદન્તિ તથૈકતામ્ ।
એકસ્ય વિદ્ધિ દેવસ્ય સર્વં જગદિદં વશે ॥ ૨૮॥

નાનાભૂતસ્ય દૈત્યેન્દ્ર તસ્યૈકત્વં વદત્યયમ્ ।

જન્તુઃ પશ્યતિ જ્ઞાનેન તતઃ સત્ત્વં પ્રકાશતે ॥ ૨૯॥

ઇતિ મહાભારતે શાન્તિપર્વણિ ૨૭૧ અધ્યાયાન્તર્ગતં
સનત્કુમારપ્રોક્તં વિષ્ણુમાહાત્મ્યં સમ્પૂર્ણમ્ ।

મહાભારત । શાન્તિપર્વ । અધ્યાય (૨૮૬)૨૭૧/૧૯-૨૯॥

mahAbhArata . shAntiparva . adhyAya (286)271/19-29..

Proofread by PSA Easwaran

*Sanatkumaraproktam Vishnumahatmyam*
pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*